# कुलदैवत श्री देव लक्ष्मीनारायण स्तोत्र

## || श्री लक्ष्मीनारायण प्रसन्न ||

उपदादित्यसंकाषं पीतवाससमच्युतम् |
शंखचक्रगदापाणि ध्यायेल्लक्ष्मीपतीम् हरिम् ||

ॐ नमो नारायणायेति जप: अथ मुलाष्टकम्

ॐ नारायण: परं ज्योतिरात्मा नारायण: पर: |
नारायण: परं ब्रह्म, नारायण नमोऽस्तु ते ||

नारायण: परो देवो दाता नारायण: पर: |
नारायण: परो ध्याता, नारायण नमोऽस्तु ते ||

नारायण: परं धाम ध्यानं नारायण: पर: |
नारायण: परो धर्मो, नारायण नमोऽस्तु ते ||

नारायण: परो वैद्यो विद्या नारायण: पर: |
विश्र्व नारायण: साक्षात् नारायण नमोऽस्तु ते ||

नारायणाद्विधिर्जातो जातो जातो नारायणच्छिव: |
जातो नारायणादिन्द्रो नारायण नमोऽस्तु ते ||

रविर्नारायण तेज: चांद्र नारायणं मह: |
वन्हिर्नारायण: साक्षात् नारायण नमोऽस्तु ते ||

नारायण उपास्य स्याद् गुरुर्नारायण: पर: |
नारायण: परो बोधो नारायण नमोऽस्तु ते ||

नारायण: फलं मुख्यं सिद्धीर्नारायण: सुखं |
सेव्यो नारायण: शुद्धो नारायण नमोऽस्तु ते ||

**शुभं भवतु !**